# संस्कृत वार्ता:

दिनाङ्क : 15.09.2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

- नवदिल्ल्या प्रतिपादितं यत् खातिप्रदेशे वाणिज्यिक-पोतानां, सामुद्रिकयात्रिणां, नागरिकाणां तथा नागरिकमूलसंरचनायाः लक्ष्यीकरणम् भारताय अस्वीकार्यम् अस्ति।
- रक्षामन्त्री राजनाथसिंहः रक्षाक्षेत्रे आत्मनिर्भरतां प्राप्तुं सशस्त्रबलानां, रक्षानुसन्धान-विकास-सङ्घटन-संस्थायाः तथा उद्योगजगतः मध्ये अधिकसहकारस्य आह्वानं कृतवान्।
- उत्तरप्रदेश-उत्तराखण्ड-हिमाचलप्रदेश-हरियाणा-राजस्थान-दिल्ली चेत्येतेषां मुख्यमन्त्रिभिः यमुनानद्याः पुनरुद्धाराय किशाऊ-बहुउद्देशीयबन्ध-परियोजनासम्बद्धे सन्धौ हस्ताक्षराणि कृतानि।
- अमेरिकायाः न्यायालयेन वैदेशिकछात्राणां वार्ताहराणां च कृते ट्रम्प-प्रशासनेन निर्धारितेषु नूतन-पारगमनानुमतिपत्र-नियमेषु प्रतिबन्धः स्थापितः।
- **अपि च,**
- पुरुष-क्रिकेट्क्रीडायां भारतम् अद्य सायं नवदिल्ल्याम् अफगानिस्तानं विरुध्य द्वितीयायां विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-स्पार्धायां क्रीडिष्यति।

---------------------------------------------------------------

## विदेशमन्त्रालयः

नवदिल्ल्याम् आयोजितस्य अष्टादशतमस्य ब्रिक्स्-शिखरसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना चीनदेशस्य राष्ट्रपतिना सह वार्तालापः कृतः इति विदेशमन्त्रालयेन संसूचितम्। नवदिल्ल्यां साप्ताहिक-वार्ताहर-सम्मेलनस्य समये, मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत्, तयोः वार्तालापस्य समये, प्रधानमन्त्री सबलं प्रतिपादितवान् यत् उभौ पक्षौ परस्परं मूलचिन्ताविषये संवेदनशीलतां दर्शयितव्यम्। ओमानस्य तटसमीपे वाणिज्यिक-पोतस्य एम्.टी. एल्. गैया इत्यस्य उपरि कृते आक्रमणसम्बन्धी प्रश्नस्य उत्तरं ददन् श्रीजायसवालः उक्तवान् यत् अस्मिन् प्रदेशे वाणिज्यिक-पोतानां, समुद्रीयकर्मकराणां, नागरिकाणां तथा नागरिकमूलसंरचनायाः लक्ष्यीकरणं भारताय अस्वीकार्यं अस्ति। पाकिस्तानद्वारा जैश-ए-मोहम्मद-सङ्घटनस्य प्रमुखाय मसूद-अज़हर् इत्यस्मै पाकिस्तानस्य सप्ततिलक्ष-रूप्यकाणां पारितोषिकस्य घोषणासम्बन्धी प्रश्नस्य उत्तरं ददन् विदेशमन्त्रालयस्य

प्रवक्ता रणधीरजायसवालः उक्तवान् यत् पाकिस्तानस्य एतादृशानि कौशलानि, जनवञ्चनायाश्च प्रयत्नाः नूतनाः न सन्ति। भारतं पूर्वमपि एतादृशान् प्रयत्नान् दृष्टवान् अस्ति। श्रीजायसवालः उक्तवान् यत् पाकिस्तानं केवलं घोषणाः न कृत्वा दृढकार्याणि कुर्यात्, यतः एतादृश्यः घोषणाः अन्ततः निष्फलाः एव भवन्ति।

---------------------------------------------------------------

**रक्षामन्त्री राजनाथसिंहः**

रक्षामन्त्री राजनाथसिंहः अद्य उक्तवान् यत् भारतं रक्षाक्षेत्रे आयातेषु आश्रितं न भवेत्, अपितु आत्मनिर्भरतादिशि अग्रे गच्छेत् इति सुनिश्चेतुं प्रशासनेन विविधाः उपायाः कृताः सन्ति। सः बलं दत्तवान् यत् रक्षाबलानां, अनुसन्धान-विकास-संस्थानां तथा उद्योगजगतः मध्ये निर्बाधसहकारेण आत्मनिर्भरता प्राप्तुं शक्यते। असौ प्रौद्योगिकीं शीघ्रस्वीकरणाय तथा भारतस्य रक्षानिर्माण-पारिस्थितिकी-तन्त्रस्य सुदृढीकरणाय अधिकसंवादस्य, सह-विकासस्य सह-उत्पादनस्य च आवश्यकतायां बलं दत्तवान्।

नवदिल्ल्याम् ऐषमः रक्षानुसन्धान-विकास-सङ्घटन-उद्योग समन्वय-उपवेशनं, 'विमर्श' इत्येतं सम्बोधयन् श्रीसिंहः उक्तवान् यत् रक्षानुसन्धान-विकास-सङ्घटन-संस्थया युद्धविमानेभ्यः आरभ्य पनडुब्बीपर्यन्तं अथ कृत्रिमबुद्धिमत्तापर्यन्तं च विविधेषु क्षेत्रेषु स्वकीयाः क्षमताः प्रदर्शिताः सन्ति।

रक्षामन्त्री उक्तवान् यत् विगतेषु कतिपयेषु वर्षेषु रक्षाक्षेत्रे कृताः परिष्काराः अभूतपूर्वाः सन्ति तथा अनेके महत्त्वपूर्णाः निर्णयाः स्वीकृताः, येन अस्मिन् क्षेत्रे व्यापकपरिवर्तनं जातम्।

---------------------------------------------------------------

## शाह - किशाऊ-बन्धपरियोजना

उत्तरप्रदेश-उत्तराखण्ड-हिमाचलप्रदेश-हरियाणा-राजस्थान-दिल्ली चेत्येतेषां नगराणां मुख्यमन्त्रिभिः अद्य यमुनानद्याः पुनरुद्धाराय किशाऊ-बहु-उद्देशीय-बन्धपरियोजनासम्बद्धे सन्धौ हस्ताक्षराणि कृतानि। नवदिल्ल्यां केन्द्रीयगृहमन्त्रिणः अमितशाहस्य उपस्थितौ अस्मिन् सन्धौ हस्ताक्षराणि जातानि ।

अस्मिन् अवसरे केन्द्रीयजलशक्तिमन्त्री सी.आर्.पाटिलः, केन्द्रीयगृहसचिवः, केन्द्रीयजलसंसाधनसचिवः तथा सम्बद्धराज्यानां मुख्यसचिवाश्च उपस्थिताः आसन्। अस्य वर्षस्य जून्-मासे केन्द्रीयगृहमन्त्री एतेषां राज्यानां मुख्यमन्त्रिभिः सह अस्मिन् विषये उपवेशनस्य अध्यक्षतां कृतवान्।

तस्मिन् उपवेशने निर्णीतं यत् किशाऊ-बहु-उद्देशीय-बन्धपरियोजनायाः जलघटकस्य व्ययस्य नवतिप्रतिशतं केन्द्रप्रशासनं केन्द्रीयसहायतारूपेण निर्वक्ष्यति, अवशिष्टं दशप्रतिशतं वित्तीयभारं षड्भिः सहभागि-राज्यैः विभज्य वहिष्यते।

---

## गुजराते अर्थव्यवस्था-मञ्चम्

पर्यावरण-वन-जलवायुपरिवर्तनमन्त्री भूपेन्द्रयादवः उक्तवान् यत् भारतं स्वस्य सततविकासस्य संरचनायां चक्रीय-अर्थव्यवस्थायाः सिद्धान्तान् समावेशयितुं प्रतिबद्धम् अस्ति। मन्त्रिणा उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतेन पुनरुपयोगस्य, जीर्णोद्धारस्य संरक्षणस्य च स्वकीयाः प्राचीनसांस्कृतिकमूल्याः समकालिकनीतिषु समावेशिताः।

अद्य गान्धीनगरस्य महात्ममन्दिरे आयोजितस्य ऐषमः डब्ल्यू.सी.ई.एफ्. इति विश्वचक्रीय-अर्थव्यवस्था-मञ्चस्य दशमसंस्करणस्य उद्घाटनसत्रं सम्बोधयन् मन्त्रिणा प्रतिपादितम् यत्

ई.पी.आर्. इति विस्तारित-उत्पादक-उत्तरदायित्व-नियमाः तथा मिशन लाइफ़ सदृशाः उपक्रमाः चक्रीयार्थव्यवस्थायाः सुदृढीकरणाय महत्त्वपूर्णाः प्रयत्नाः सन्ति इति। ब्रिक्स्-नवदिल्लीघोषणा, भारत-यूरोपीयसङ्घसंयुक्तरूपरेखा, मिशन् लाइफ् सदृशानां विविधा-वैश्विक-सहयोगोपक्रमाणाम् उल्लेखं कुर्वता मन्त्रिणा उक्तं यत् पुनःप्रयोगव्यवस्थायाः प्रारम्भः गृहेभ्यः एव भवितव्यः। गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः अस्य मञ्चस्य उद्घाटनं कृतवान्। भारते प्रथमवारम् अस्य मञ्चस्य आयोजनं भवति।

---

## दूरदर्शनस्य सप्तषष्टितमं स्थापना-दिवसम्

भारतस्य लोकसेवाप्रसारकं दूरदर्शनम् अद्य स्वस्य सप्तषष्टितमं स्थापना-दिवसम् आचरति। लोकसेवाप्रसारकेन नवपञ्चाशदधिक-नवदश-शततमे वर्षे ऑल् इण्डिया रेडियो इत्यस्य अन्तर्गतं प्रायोगिक-दूरदर्शनसेवारूपेण स्वस्य यात्रा आरब्धा। विगतेषु दशकेषु इदं सूचनाप्रसारणस्य, सांस्कृतिकसंरक्षणस्य, राष्ट्रैक्यस्य च महत्त्वपूर्णं माध्यमरूपेण विकसितम् अस्ति। उपग्रह-माध्यमेन अथ डी.टी.एच्. इति सेवाभिः च इदं देशस्य प्रायः शतप्रतिशतं जनसमूहम् उपगच्छति।

---

## राष्ट्रिय-अभियन्तृ-दिवसः

भारतस्य महान् अभियन्तृषु अन्यतमस्य भारतरत्नस्य मोक्षगुण्डम् विश्वेश्वरैयावर्यस्य जन्मदिवसस्य उपलक्ष्ये अद्य राष्ट्रिय-अभियन्तृ-दिवसः आचर्यते। विश्वेश्वरैया-वर्यस्य योगदानस्य स्मरणार्थं, राष्ट्रस्य विकासे अभियन्तृणां भूमिकायाः सम्मानार्थं च प्रतिवर्षं सितम्बर-मासस्य पञ्चदशदिनाङ्के अयं दिवसः आचर्यते। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च एम्. विश्वेश्वरैया-वर्यस्य जन्मदिने श्रद्धाञ्जलिम् अर्पितवन्तौ।

सामाजिकान्तर्जालीये पटले उपराष्ट्रपतिः अवदत् यत् एम् विश्वेश्वरैया एकः सुप्रसिद्धः अभियन्त्रकः दूरदर्शी राष्ट्रनिर्माता च आसीत्, यस्य योगदानम् आगामि-वंश-परम्परां यावत् प्रेरयिष्यति। श्रीराधाकृष्णन् वर्यः अवदत् यत् अभियन्तारः नवान्वेषणस्य, तन्त्रज्ञानस्य, परिवर्तनशील-समाधानस्य च माध्यमेन भारतस्य प्रगतिं चालयन्ति, येन जनानां राष्ट्रस्य च जीवनं प्रगतिशीलं भवति। सः कामनाम् अकरोत् यत् देशस्य अभियन्तारः सुदृढं समृद्धं विकसित-भारतं निर्मातुं निरन्तरं प्रयतन्तु इति। श्रीमोदी अवदत् यत् एम्. विश्वेश्वरैया एकः अभियान्त्रिकी प्रतिभा आसीत् यस्य राष्ट्रनिर्माणदृष्टिः नागरिकान् निरन्तरं प्रेरयति। प्रधानमन्त्रिणा अभियन्तृभ्यः उत्तमस्य भविष्यस्य निर्माणार्थं, नवान्वेषणार्थं, समाह्वानानां समाधानार्थं च तेषां योगदानार्थं शुभाशयाः प्रेषिताः।

---

**अमेरिका-न्यायालय**

अमेरिकायाः न्यायालयेन वैदेशिकछात्राणां वार्ताहराणां च कृते ट्रम्प-प्रशासनेन निर्धारितेषु नूतन-पारगमनानुमतिपत्र-नियमेषु प्रतिबन्धः स्थापितः।

---

**क्रिकेट्**

पुरुष-क्रिकेट्-क्रीडायाम्, अद्य सायङ्काले सार्धसप्तवादने दिल्ल्याः अरुणजेट्ली-क्रीडाङ्गणे द्वितीयायां विंशतिप्रतिविंशति-अन्ताराष्ट्रिय-क्रीडायां भारतम् अफगानिस्तान्-देशेन सह स्पर्धिष्यति। रविवासरे आरम्भिक-स्पर्धायां सप्त-स्तोभैः विजयस्य अनन्तरं, भारतं तिसृणां क्रीडा-शृङ्खलायां एक-शून्य इत्यङ्कान्तरालेन अग्रे अस्ति।

।। इति वार्ता: ।।